५९

कामकलाविलासः

नं. ४८३

कामकलाविलासः

नं० १५२१

1

الوان

सं० १५२१ के
कामकलाविलास
२१ पत्राणि
तस्यादि
सं० १९५३ वि०

#5956

E 21

Complete

ॐ श्रीगणेशाय नमः ॐ नमस्त्रिपुरसुं
दर्यै ॐ सकलभुवनोदयस्थितिलय
मयलीलाविनोदनोद्युक्तः अन्तर्लीन
विमर्शः पातु महेशः प्रकाशमात्रत
नुः १ ॥

ॐ श्रीगणेशाय नमः ॐ नमोऽपरवार्थायशु
द्धज्ञानैकरूपिणे निर्मलाय प्रसन्नाय दक्षि
णामूर्तये नमः अत्र पुण्यानन्दयोगिनः स
कलविद्यादेवतं मूलात्रिपुरसुंदरीमंत्रचक्र
माचिकीर्षितनया तदधिष्ठानं मूलकामका
मेश्वररूपादावाचष्टे सकलेत्यादि सकला
नां भुवनानामुदयः सर्गः स्थितिरवस्थालयो ना
शपर्यन्तत्रिनयं तिरोधानानुग्रहयोरुपलक्षण
म् एतत्पंचविधकृत्यप्रचुराया लीलातया वि
नोदने क्रीडने तस्मिन्नुद्युक्तो जागरूकः मयट्
अत्र प्राचुर्यार्थे विहितः एवं च सति जगद्भाति
रिक्तलक्षणं ब्रह्मस्वरूपं कीदृशमित्याशंका
यामाह अन्तर्लीनविमर्श इत्यादिना विमर्शप
दे परामर्शपरे इदमिति विमर्शः प्रपंचः इदमि
त्येव परमात्मना स्रष्टस्य जगतः प्रसिद्धिपराम
र्शः अन्तर्लीनोऽन्तर्गतो यस्य स अन्तर्लीनविम
र्शः उदयमत्रार्थेः स्वात्मसात्कृताखिलप्रपंचः
परिपूर्णाहंभावभावनागर्भितः अथवा जग

उत्पत्तिस्थितिलयहेतुभूतामकृत्रिमाहमितिप
रामर्शो विमर्शः तथा नागानंदः विमर्शो नाम
विश्वाकारेण विश्वप्रकाशेन विश्वसंहारेण वा
कृत्रिमाहमिति विश्वस्फुरणम् तस्यान्तर्लीन
त्वं नामान्तर्मुखत्वम् तथा चायमर्थः अन्तर्ली
नोऽन्तर्मुखो विमर्शः पूर्णाहंभावो यस्येति तत्ता
दृशपरब्रह्मणः परमेश्वरस्य प्रकाशैकस्व
भावत्वम् सर्वस्मात्परत्वं चाह प्रकाशमात्रत
नुर्महेश्वर इति स्वप्रकाशत्वं नाम इच्छामि
जानामि करोमीत्युत्तमपुरुषान्तर्गतस्फुरण
रूपाहंपरामर्श एव ननु सूर्यादीनामपि प्र
काशत्वं दृष्टम् तत्कथमस्यैव परमात्मत्वम
त आह महेश इति महांश्चासावीशश्चेति महे
शः महत्त्वं च देशकालाकारैरनवच्छिन्नस्वरू
पत्वात् ईशत्वं सर्वनियन्तृत्वादिति पराभट्टा
रिकायामपि सर्वाकारत्वमाह १ ॥

**सा जयति शक्तिराद्या निजसुखमय**
**नित्यनिरुपमाकारा भाविचराचर**
**बीजं शिवरूपविमर्शनिर्मलादर्शः २**

साऽऽद्या शक्तिरनवच्छिन्ना पराभट्टारिका महा
त्रिपुरसुंदरी जयति सर्वोत्कर्षेण वर्तते सेति

का॰
क॰ २
2

शिवादिक्षित्यन्तषट्त्रिंशत्तत्त्वमयी सर्वप्रपंचात्मि
का तदुत्तीर्णा चेति सर्वोपनिषत्सु सिद्धान्तेषु चाभि
धीयते विश्वस्तेजोभिः परामृता विभूत्या इति नि
गद्यते तस्याश्च सर्वोत्कृष्टत्वं सर्वेष्वागमेषूद्घो
ष्यते एतदेव विवृणोति निजेत्यादिना निजः स्वा
भाविकः सुखमयः दुःखासंभिन्नः नित्यः सार्व
कालिकः निरुपमः निरवधिकः आकारः स्वरू
पं यस्याः भाविचराचरबीजं भाविनोः संपत्स्य
मानयोः स्थावरजंगमयोः बीजं योनिः कार
णमित्यर्थः ननु शिवस्य यथा जगन्निर्मातृत्वं
शक्त्या विना न संगच्छते एवं पराशक्तेरपि पर
मशिवेन विना कारणत्वं न भवेदिति तत्कथ
मुच्यते भाविचराचरबीजमिति अत आह
शिवरूपविमर्शनिर्मलादर्श इति शिवस्य
स्वरूपमहमित्येवमाकारं तस्य विमर्शः प
रामर्शनमहमित्येवंरूपं ज्ञानं तस्य प्रकाश
ने निर्मलादर्शः सम्यक्प्रकाशनचतुर इत्य
र्थः यथा कश्चिद्राजातिसुंदरः स्वात्माभिमु
खस्थितस्वच्छादर्शतले स्वात्मप्रतिबिम्बस
म्यक्समीक्ष्य तत्प्रतिबिम्बमहमिति जाना
ति एवं परमेश्वरोपि स्वाधीनमहन्तास्वात्मश
क्तिसम्यगवलोकात् स्वस्वरूपमवगच्छति प
रिपूर्णोहमिति विमर्शमेव [illegible] वदन्ति केचि
त् तत्कथमुच्यते विमर्शः कलेत्यत आह २

स्फुटशिवशक्तिसमागमबीजांकुररूपि
णी पराशक्तिः अणुतररूपानुत्तरावि
मर्शलिपिलक्ष्यविग्रहा भाति ३ ॥

अत्र पराशब्देन प्रकृताख्याता महात्रिपुरसुंदर्य
भिधीयते चिदानंदेच्छाज्ञानक्रियारूपेति स्फु
तिप्रसिद्धतया एवमुच्यते स्फुटशिवशक्तिस
मागमबीजांकुररूपिणीति शिवश्च शक्तिश्च शि
वशक्ती तयोः समागमः संयोगः स्फुटः व्यक्तः शि
वशक्तिसमागमो यस्तेन बीजांकुररूपिणीति बी
जादंकुरमंकुराद्बीजमिति वचनात् शिवतत्त्वा
दिक्षितितत्त्वपर्यन्तं तत्त्वजालमुत्तरोत्तरमुत्पाद
येदित्यर्थः अत्र शिवशब्देन ज्ञानशक्तिरभिधीय १०
ते ज्ञानशक्त्यधिष्ठानत्वात् शिवतत्त्वस्य शक्ति
शब्देनापि क्रियाशक्तिरभिधीयते क्रियाशक्त्य
धिष्ठानत्वाच्छक्तितत्त्वस्य चिदानंदस्वरूपिण्याः
सर्वज्ञानक्रियाभ्यामेव निर्माणे चित्य दर्श
नात् पुनस्तामेव विशिनष्टि अणुतररूपानु
त्तरविमर्शलिपिलक्ष्यविग्रहा भाति अणुतरम
त्यन्तसूक्ष्मरूपमस्याः इति अनुत्तरलिपिरका
रः विमर्शलिपिर्हकारस्ताभ्यां लक्ष्यं विग्रहं स्व
रूपं यस्याः तथोक्ता अत्रानुत्तरविमर्शलिपिल
क्ष्यविग्रहेत्यनेन अहमात्मिकान्तर्गर्भितस
मस्तवर्णकदम्बका पराशक्तिः अकारादिह

का॰
क॰
३

3

कारणं पञ्चाशदक्षररूपिणी वर्णपदमंत्रकलात
त्त्वभुवनात्मकसमस्तप्रपंचजननयित्री परा भट्टा
रिका समस्तभूतान्तरात्मा सर्ववेदान्तेष्वहमह
मित्येवमाकारेण प्रतीयमानाहृपपते इत्युक्तं भव
ति इतः परप्रबंधेन प्रधानप्रतिपाद्यां कामकला
क्षररूपिणीमेवं कामः शिवस्तदक्षररूपं वक्तु
मुपक्रमते परशिवरविकर इत्यादि कलाच
दहनेन्दुविग्रहौ बिंदू इत्यन्तम् ३ ॥

**परशिवरविकरनिकरे प्रतिफलति**
**विमर्शदर्पणे विशदे प्रतिरुचिर**
**चिरेकुड्ये चिन्मये निविशते महाबि**
**न्दुः ४ ॥**

परशिवः प्रकाशैकस्वभावः परमशिवभट्टारकप
रविर्दिनकरस्तस्य कराः किरणास्तेषां निकरः
पुञ्जः तस्मिन् विशदे निर्मले विमर्शदर्पणे विमर्शो
नामात्तवधिरेकाविस्फुरणशक्तिः तथा प्रत्य
भिज्ञायां सा स्फुरत्तेत्यादि नैव दर्पणत्वेन निरू
पणे स्वस्वरूपप्रकाशत्वात् तत्र प्रतिफलनं
नाम स्वरूपावलोकनं तादृशप्रतिफलनरू
पावलोकने सति चित्तमये ज्ञानैकस्वरूपे
प्रतिरुचिरुचिरे प्रतिप्रकाशमनोहरे कुड्ये
महाबिंदुः निविशते प्रतिष्ठितो भवति चि

त्तस्य ऊर्ध्ववर्तिरूपेण महाबिंदाविमर्शावकार
णत्वात् लोकेपि सूर्याभिमुखस्थितदर्पणत
ले सूर्यकिरणप्रतिहतं तेजोबिंदुः प्रत्यक्षं प्र
तिपद्यते तद्वत्प्रकाशरूपपरमेश्वरस्पंदपि
णावस्वरूपविमर्शसंबंधे जाते इदानीं तत्र
महाबिंदुः पूर्णोहमित्येवंरूपः परमेश्वरोव
भासते इत्यर्थः आगमस्थ स्फुरत्तामात्मनः
पश्येत्तदा वक्रस्य सम्भव इति प्रत्यभिज्ञाया
मपि सा स्फुरत्ता महासत्तेत्यादि परमानंद
योगिनोपि ईदृगियत्तादिवचोहरनरंस्वानु
भूतिसंवेद्यम् तत्राष्टधा स्फुरत्तापिधासंवित्क
ष्पंतु सा वाच्या इत्यादिनाष्टधुज्ज्वलात्मशाक्तपव
लोकनोद्भूताहम्भावमेव विशिनष्टि ४ ॥

**चिन्मयोहंकारः सव्यक्ताहार्णसम
रसाकारः शिवशक्तिमिथुनपिंडः
कवलीकृतभुवनमंडलो जयति ५**

अहंकार इति उद्भूतान्यस्मरणानुभवव्यंजको यो
यमहमित्येवविमर्शः तस्याकारः कारणमेवं
भूतोहंकारो जयति सर्वोत्कर्षेण वर्तते प्रका
शस्यात्मविश्रांतिरहम्भावो हि कीर्तितः चिन्त
मयः ज्ञानैकस्वभावः सव्यक्ताहार्णसमर

का· क· ध

साकारः अस्य हस्येत्य ह्रौ तु नटांघ्रिकौ स्य ष्टौ परस्य
रोहन्तद्रूपौ खद्यक्राहौ एव लोलीभवतो यत्र
सः शिवशक्तिमिथुनपिंडः अत एव कवलीकृ
तभूमंडलः स्वस्यापितभुवनमंडलं यद्विंश
तत्त्वसंघातमयं येन सः अयमर्थः प्रत्याहार
न्यायेनान्तर्गर्भितसमस्तवर्णकदम्बकाहंका
रतद्रूपप्रकाशविमर्शसम्पुटादेव शब्दार्था
त्मकसर्वप्रपंचविकासो भवति तथा च श्रु
तिः एको वर्णो बहुधा शक्तियोगाद्वर्णाननेके
कान्निहितार्थो दधाति इतः पर्यंचितमयेति
विशते महाबिंदुरित्युक्तम् तत्र बिन्दुस्वरूप
निरूपणद्वारा कामकलामुपदिशति ५ ॥

सितशोणबिंदुयुगलं विविक्तशिव
शक्तिसंकुचत्प्रसरम् वागर्थसृष्टि
हेतुः परस्परानुप्रविष्टविस्पष्टम्
६ ॥

सितः शुभ्रः शोणो रक्तः तद्रूपौ बिंदू तयोर्युगल
म् अत एव विविक्तशिवशक्ति अन्योन्यविहर
णपरे शिवशक्ती यस्मिन् कर्मणि तत् अत एव
संकुचत्प्रसरम् संकुचत् कुण्डलीभवत् प्रसरः
जगत्सृष्टिरूपो यस्मिंस्तत् वाचः परापश्यन्त्या
दिरूपसमस्तशब्दाः अर्थाः शिवादिक्षित्यन्त

षट्त्रिंशत्तत्त्वरूपाभ्यो यस्सृष्टिः षडध्वात्मकजग
न्निर्मितिस्तत्र हेतुः कारणम् परस्परानुप्रवि
ष्टविस्पष्टम् परस्परमन्योन्यमनुप्रविष्टम
न्तर्गतं विस्पष्टं स्पष्टम्भूतं च तत् एवं रूपं सि
तशोणबिन्दुयुगलं कामकामेश्वररूपं दिव्य
मिथुनं विभावयेत् इति पूर्वेण सम्बन्धः अ
येदमतिरहस्यम् यः परः परमेश्वर अखि
लवेदादिशास्त्रोत्पादकानुत्तराभिधेयः पर
मेश्वरः स्वांगभूतः स्फुरत्तारीत्यानिखिलप्र
पंचविलयात्मकविमर्शशक्तिमनुप्रविश्य
बिन्दुभावं मन्यते ततः सा विमर्शशक्तिरपि
स्वान्तर्गतं प्रकाशमयं बिंदुमनुप्रविशति
ततश्च बिंदुस्तत्पनो भवति तस्माद्धि दोर्नादात्मि
का समस्ततत्त्वगर्भिणी तेजोमयी जीवरूपा वा
लाग्रवत्सूक्ष्मरूपिणीति गत्या शृंगाटकरूप
तामुद्गृह्णते एवं च बिंदुनादस्वरूपयोस्तयोः
प्रकाशविमर्शयोस्तयोरहमिति शरीरं भवति
एवं द्विरूपयोस्तयोर्मध्ये एको विमर्शो रक्तबिं
दुरूपतां भजते अपरः प्रकाशः शुक्लबिन्दु
भावमेति उभयोर्मेलने मिश्ररूपं सर्वतेजो
मयं परमात्मस्वरूपं भवति स्फूर्तिरपि एको
वर्णो बहुधा शक्तियोगाद्वर्णाननेकान्निहि
तार्थान् दधाति एतदेव बिन्दुत्रयस्य रूपं वि
वृणोति ८ ॥

का॰
क॰
५

बिन्दुरहंकारात्मा रविरेतन्मिथुनस
मरसाकारः कामः कमनीयतयाक
लाचदहनेन्दुविग्रहौबिंदू ८ ॥

बिंदुरहंकारात्मेति बिंदुः सितरक्तस्वरूपोऽहंका
रात्मा अन्तर्गर्भितसमस्तवर्णराशिः अनुत्तरस्य
स्फाररूपहकाराकारैक्यतादात्म्यस्वरूपं यस्य सः
वर्णात्कार इति सूत्रेणाहंप्रत्याकाररूपः प्रत्ययः
ऐकार इतिवत् अत एवैतस्मिन्मिथुनसमरसा
कारः एतयोः अकारहकाररूपयोः प्रकाशवि
मर्शयोर्मिथुनं द्वंद्वं तस्यादिव्यदम्पतीरूपस्य
मिथुनस्य समरसः परस्परानुप्रवेशरूपमा
नुकूल्यं तदेवाकारः स्वरूपं यस्य सः एवंभूतो
रविः सितशोणबिंदुसमरसीभूतो मिश्रबिंदु
रित्यर्थः लोकेपि सूर्यस्य मिश्रस्वरूपत्वम् अ
ग्नीषोमयोः अत एव तस्योपास्यत्वमाह का
म इति काम्यते अभिलष्यते स्वात्मत्वेन परमार्थः
महद्भिर्योगिभिरितिकामः तत्र हेतुः कम
नीयतया इति कमनीयत्वं स्पृहणीयत्वम्
कलाविमर्शशक्तिः दहनो वह्निः इंदुश्चन्द्रस्ता
वेवाकारौ ययोर्बिन्दू दहनेन्दुविग्रहौ बिन्दू अ
यमर्थः अग्नीषोमरूपिणी विमर्शशक्तिः त
दुभयभूतकामेश्वरात्मिताभूता महात्रिपुर

सुंदरीबिन्दुसमष्टिरूपा कामकलेत्युच्यते से
वोपास्यतया सर्वागमेषु प्रोच्यते उक्तं च मिहिर
बिन्दुस्त्वंनदयोलसच्छिखिज्ञतापानविंदुयुग
लनीम् सपरार्धकलारचनास्यादं भजन्ति नि
त्यमिमां परदेवताम् एकारोधगतो बिंदुर्मुखं
भानुरधोगतौ स्तनौ दहनपीतांशूयोनिर्हार्ध
कला भवेत् इत्यादि रहस्यम् अथ मन्त्रनिष्कर्षः
स्वान्तर्गतानन्ताद्भुतराशिमहामंत्रवीर्यपूर्णाह
न्तारूपिणी प्रकाशानन्दसारा बिंदुत्रयसम
ष्टिरूपलिप्यक्षररूपिणी कामकलानाम म
हात्रिपुरसुंदरी मातृका परमयोगिभिर्मह
माहेश्वरैरतिशामनुस्मर्तव्येति विज्ञानभट्टा
रकेपि बिन्दुरूपस्य चक्रस्य स्थूलवर्णक्रमेणानु
अर्धेन्दुबिंदुनादान्तशून्योच्चाराद्भवेच्छिव इति
एवं बिंदुस्वरूपमुपदिष्टम् ज्ञानोपासनायाः
फलं ब्रह्मभावएवाह ७ ॥

तदुक्तं बिन्दुसंक
ल्पवक्त्रं ततस्तदधस्ता
त्कुचयुगम् तदधः स
परार्धं तु चिन्तयेत्तद
धो मुखम् ॥

**इति कामकलाविद्या देवीचक्रक्रमा
त्मिका सेयम् विदित्वा येन सर्वज्ञो
भवति महात्रिपुरसुंदरीरूपः ८ ॥**

पूर्वोक्तमहाप्रबंधेन व्याख्यानात् कामकलात्रिपु
रसुंदरीनस्या विद्याज्ञाने कीदृशीत्याकांक्षाया
माह देवीचक्रक्रमात्मिका देव्यास्त्रिपुरसुंदर्या

का॰
क॰
८

अर्कंजीवचक्रंतस्यक्रमःचक्रमंत्रदेवतात्मनासर्वा
नंदमयादिसमस्तप्रकटपर्यन्तरूपः तदात्मिका
तद्विषयिणीयेनशक्तिपाताद्ध्रल्लजिज्ञासुनाभा
वयतागुरुमुखेणविदिताअवगतासगुरुमुखोमुक्तो
भवति विद्याभिज्ञानैश्वर्यश्चिह्नोमुक्तएव सद
तिप्रत्यभिज्ञास्थित्यासंसारवासनानिरासनप
टीयोनवरत्नपरिपूर्णाहंभावभावनाकवली
कृतसर्वप्रपंचः परमयोगीविहरते अंतेपिमहा
त्रिपुरसुंदरीरूपोभवति पराभट्टारिकात्मरूपोभ
वति परमार्थभूतप्रकृतबिंदोरेवसकाशाज्जग
दुत्पत्यादिकंवक्तुमारभते ८ ॥

**स्फुरितनादरूपाद्बिंदोर्नादब्रह्माङ्कुरोर**
**वोव्यक्तः तस्माद्गगनसमीरणदहनो**
**दकभूमिवर्णसंभूतिः ९ अथविषा**
**दादपिबिंदोर्गगनानिलवह्निवारिभू**
**मिजनिः एतत्पंचकविकृतिर्जगदि**
**दमएवाब्रजाण्डपर्यन्तम् १० ॥**

स्फुरितादुच्छूनात् बिंदोः पूर्वोक्तलक्षणात् नादब्र
ह्माङ्कुरः नादः सर्वशब्दोत्पत्तिहेतुर्वर्णः सएवब्रह्म
तद्ब्रह्माङ्कुरउत्पादकंयस्यसः तथाचोक्तम् एको
नादात्मकोवर्णः सर्वनाद विभागवान् सोनस्त
मितरूपत्वादनाहतइतिस्मृत इति एवंभूतनाद

ब्रह्मात्मकोरवः शब्दः पश्यन्त्यादिरूपोऽव्यक्त आ
विर्भूतः तस्माच्छब्दाद्गगनसमीरणदहनोदकभू
मीनां पंचभूतानां वर्णानामादिक्षान्तानां च
सम्भूतिरुत्पत्तिराम्नाता एवं शोणबिंदोस्सर्वात्म
त्वं सर्वस्रष्टृत्वमुक्त्वा तदिह शुभ्रबिंदोरपि तत्स्व
रूपमतिदिशति अथ विसर्गादिति विसर्गात्स
र्वप्रकाशाद्बिंदोः पूर्वव्याख्यानात् गगनादिपं
चभूतात्मकानन्तब्रह्माण्डान्याविर्भावतिरोभा
वौ भजत इत्यर्थः तथा चागमः स्वेच्छाविलसि
तानन्तजगद्रूपमविलासवत् नौमि संविन्महा
पीठं शिवशक्तिपराद्वयमिति एवं बिंदुद्वयाभे
दमुक्त्वा तद्दृष्टान्ततया मन्त्रदेवतयोरप्यैक्यमाह

॥ १० ॥

**बिंदुत्रितयं यद्वदभेदविहीनं परस्परं त**
**द्वत् विद्यादेवतयोरपि न भेदलेशो**
**ऽस्ति वेद्यवेदकयोः ११ वागर्थौ नित्ययु**
**क्तौ परस्परं शक्तिशिवमयावेतौ सृ**
**ष्टिस्थितिलयभेदौ त्रियाविभक्तौ त्रि**
**बीजरूपेण १२**

बिंदुत्रितयं सर्वोक्तप्रकाशविमर्शात्मकं यद्वत्
येन प्रकारेण भेदविहीनं शिवशक्तिरिति हि तं
तत्वमाहुर्मनीषिणः इत्युक्तनीत्या परस्पराश्लिष्ट
तद्वत् तेनैव प्रकारेण विद्यादेवतयोः विद्यापंच

का॰ क॰ ७

दशाक्षरी देवता महात्रिपुरसुंदरी तयोर्वेद्यवेदकयो
र्वाच्यवाचकयोर्भेदलेशोपिर्ईषद्वैलक्षण्यमपिनास्ति
एवमभिन्ननादादिमिथुनादखिलंजगदाविर्भवतीति
तदेवमिथुनमात्मेच्छयैवस्वभेदमस्वभेदमकरोदि
त्याह ११ वागर्थौवाग्वर्णपदमंत्ररूपाअर्थः कलात
त्त्वभुवनात्मा एतद्रूपौतः प्रकाशविमर्शात्मकश
ब्दार्थाभ्यामेवषडध्वात्मकसर्वप्रपंचोत्पत्तिश्रवणा
त् अतएवनित्ययुक्तौ निरन्तरसंसक्तौ नहिघटपट
योरिवकादाचित्कः संबंधः तथासतिसर्वोत्पत्तिप्रसं
गः सृष्टिस्थितिलयभेदोसृष्टिः शिवादिक्षित्यन्ततत्व
जालाविर्भावः स्थितिस्तत्परिपालनम् लयस्तेषांस्वा
त्मसाक्षात्कारः एवंभूतोभेदोययोस्तौस्वात्मत्वेते
षांत्रयाणाम् तथाचाभिनवगुप्तपादाः स्वात्मगाः सृ
ष्टिसंहाराः स्वरूपत्वेनसंस्थिताइति परस्परंशक्तिशि
वमयौप्रकाशविमर्शस्वरूपौ उभयोरेकत्वाद्वह्निदा
हकवत् तत्वान्तरंनभवतीत्यर्थः अभियुक्तोक्तिश्च
तादात्म्यमनयोर्नित्यंवह्निदाहकयोरिवेति एतौपूर्वो
क्तौप्रकाशविमर्शौत्रिधात्रिप्रकारेणसंस्थितौविभ
क्तौपृथग्भूतौकेनेत्याह वाग्भवकामराजशक्तिबी
मे जानात्मकत्वेनइत्यर्थः अयमर्थः बिंदुत्रयसमष्टिका
मकलाक्षररूपिणीमहात्रिपुरसुंदरीसर्वोपास्येति
अतःपरंवाग्भवादिखंडत्रयान्तर्गतवस्तुविशेषव
र्णनद्वारा श्रीपंचदशाक्षरीविद्यामुद्धर्तुमुपक्र
मते १२ ॥

मातृमानमेयं बिंदुत्रयभिन्नबीजरूपा
णि धामत्रयपीठत्रयशक्तित्रयभेद
भावितान्यपि च १३ तेषु क्रमेण लिंग
त्रयेण तद्वन्मातृकात्रितयम् इत्थं त्रि
तयपुरीया तुरीयपीठादिभेदिनी वि
द्येति १४ ॥

माता प्रकाशांशगत ईश्वरः मानं तदवगतिसाधन
भूता विद्या ज्ञेयस्ताय माना महात्रिपुरसुंदरी एवं
मातृमानमेयभावमनुभूय विहरति धामत्रयं
सोमसूर्याग्निमंडलत्रयम् बीजत्रयं वाग्भवादि
कम् पीठत्रयं कामगिर्यादि शक्तित्रयमिच्छादि
एवमादिभेदेन भावितानि बिंदुमयत्वादेतेषां
तेषु धामादिषु विभिन्नेषु क्रमेणानुपूर्व्या लिंग
त्रयं स्वायंभुवादि मातृकात्रितयम् प्रकारवि
भेदभिन्नम् एवं विश्वसमस्तवस्तुपूरणात्तत्स
मष्टिरूपा त्रिपुरा नाम परा शक्तिराविर्भूतेत्याह
इत्थं त्रितयपुरीयेति इत्थं पूर्वोक्तप्रकारेण त्रि
तयात्मावयवानि पुराणि शरीराणि यस्याः सा त्रि
त एवं तुरीयस्य पीठात्रिविधात्मकसर्वप्रपंचा
विर्भावतिरोभावभूरित्यर्थः अतः परं तस्या जग
त्समीरणदहनोदकभूमिवर्णसंभूतिरिति
प्रथमसृष्टिप्रपंचभूतानि पृथग्गणवर्णनद्वाराक्ष
रसंख्याविशिष्टमहामंत्रात्मकदेवतास्वरूपे
वक्तुमारभते १४ ॥

का० क० ८

शब्दस्पर्शौ रूपंरसगंधौ चेति भूतसूक्ष्मा
णि व्यापकमाद्यं व्योमेत्युत्तरमेवक्रमे
ण पंचदश १५ पंचदशात्तद्रूपानि
त्याश्चैवाहि भौतिकाभिमता नित्याश
ब्दादिगुणप्रभेदभिन्नानत्यानयाव्यामाः
१६ नित्यास्तिथ्याकारास्तिथ्यश्चशिव
शक्तिसमरसाकाराः दिवसनिशाम
य्यास्ताः श्रीवर्णास्तेपि तद्रूपीरूपाः
उक्रमेवार्थे एद्धपि तद्देवतां विहियाया
तं श्वपि विश्वात्मकतं तत्ता एतांव क्रमाह
१७ ॥

शब्द आकाशगुणः स्पर्शो वायुगुणः रूपं तेजोगु
णः रसश्चापां गुणः गंधः पृथ्वीगुणः एते गुणाः
आकाशमारभ्य पृथिवीपर्यन्तमुत्तरोत्तरमेकैक
गुणाधिक्येन पंचदश गुणाः सम्पद्यन्ते एतेषां
गुणानां पंचदशभावेन श्रीविद्या पंचदशाक्ष
रीजाता भौतिकाभिमता भूतसम्बन्धित्वेनाभि
मता इष्टा अत एव पंचदशाक्षररूपास्त्वमदा
दिभूतगुणानां पंचदशत्वात् विद्याक्षराणाम
पि पंचदशत्वम् तद्रूपा तत्स्वरूपिणी नित्याकू
टस्था तरंगबुद्बुदफेनाक्षाश्चम्बुधिरिव सक
लतत्त्वाविर्भावभूमिरित्यर्थः कूटस्थायाः व

प

षोडश्यः पंचदशावयवात्मकपंचदशतिथिनि
ष्ठान्ताः पंचदशदेवतामयपंचदशाक्षरीरूप
तामाह नित्यास्तिथ्याकारा इति नित्याः कामे
श्वरीप्रभृतिचित्रान्तास्तिथ्याकाराः तिथ्यभि
मानिन्यो देवताः तिथयश्च प्रतिपत्प्रभृतिपू
र्णिमान्ताः शिवशक्तिसमरसाकाराः प्रका
शविमर्शसंपुटाकाराः अत एव दिवसनि
शामध्यः दिवारात्रिरूपाः प्रकाशविमर्शयोः
दिवारात्रित्वात् नास्तिथ्यः श्रीवर्णाः विद्या
नगीनवर्णगुणाश्चापि तद्द्वयीरूपाः तादृशप्र
काशविमर्शस्वरूपा इत्यर्थः अयमत्र विवेकः
इयमेव प्रकाशविमर्शमयी पराशक्तिः पंच
भूतात्मिका उत्तरोत्तरवृद्धिद्वारा पंचदशसंख्या
कमात्राक्षरतिथ्यभिमानदेवतास्वरूपिणी जा
ता यथागमः एक एव प्रकाशाख्यः परको
पि महेश्वरः यस्य शक्तिर्विमर्शाख्या सा नित्या
गीयते बुधैः विमर्शाख्या च सा देवी पंचविध
समागता आकाशानिलसप्तार्चिःसलिलाव
निभेदतः एकैकगुणवृद्ध्या तु तिथिसंख्यात्वमा
गता विमर्शरूपिणी विद्याषोडशीयाप्रकीर्ति
ता गता सा षोडशी भेदैस्त्रिपुरा परमेश्वरी स्वद
यीदिमह -- वी विचित्रान्तां समन्ततः स्वाग
मादेव बोद्धव्यमिति संकल्पमात्रत इति ।

२७ ॥

का॰
क॰
५

अथ स्वरव्यंजनबिंदुत्रयसमष्टिभे
दैर्विभाविताकारा षट्त्रिंशत्तत्त्वा
त्मा तत्त्वातीता च केवला विद्या १८
विद्यापिताहगात्मा हृल्लासा त्रिपु
रसुंदरी देवी विद्याविद्यात्मकयोर
न्त्याभेदमानन्यार्थ्याः १९ यासा
तनूहृद्रूपा परा महेशी त्रिविभा
विता सैव स्पष्टा पश्यन्त्यादित्रिमा
त्कात्मचक्रतां याता २० ॥

स्वराः अचः व्यंजनानि हलः बिंदुत्रयमनुस्वार
त्रयम् एषां समष्टिः समुदायभावः भेदावयव
भावः तैर्विभाविताकारा उल्लासितस्वरूपा अ
त एव षट्त्रिंशत्तत्त्वात्मा शिवादिक्षित्यन्ताऽवि
ग्रहा तत्त्वातीता च तत्त्वसंघसमुदायस्यान
त्वात्तदुत्तीर्णा च अत एव केवला स्वव्यतिरि
क्तस्य अस्वभावादेकाकिनी एवंभूता श्रीपंच
दशाक्षरीत्यर्थः अयमत्र विद्यायामवयववि
भागप्रकारः इह पुण्यानंदः हादिविद्यायाम
न्यत्ताभिमानिनी पूर्णामेव विद्यायाः अवय
वभावसमुदायमाश्रित्य तत्त्वात्मकत्वं तदुत्ती
र्णत्वमाचष्टे तत्र च वाग्भवाख्ये प्रथमखंडे

पंच स्वराः सप्त व्यंजनानि संहत्य द्वादशाव
र्णाः कामराजाख्ये द्वितीये खंडे षट् स्वराः स
प्त व्यंजनानि शाक्तिबीजाख्ये तृतीये खंडे पंच
स्वराः पंच व्यंजनानि संभूय षट्त्रिंशदक्षराणि स
र्वयत्ररूपाणि समुदायरूपाणि विद्या सर्वतन्त्रानि
क्रान्ता सर्वत्र प्रसिद्धा श्रूयते कादेरपि विद्याया उभ
यात्मकत्वमस्त्येव नैवयावानयोर्विद्ययोर्भेदः हा
दौ प्रथमखंडे पंच स्वराः सप्त व्यंजनानि संहत्य वि
द्याद्वयेपि प्रथमखंडे द्वादशवर्णत्वे समानम् त
स्मादुभयात्मकत्वमुभयोर्विद्ययोरस्त्येव तदुभ
यविद्योपासनप्रकारस्तु गुरुमुखादेवावगन्त
व्यः देवतायाश्चापि मंत्रवदुभयात्मकत्वमिति मंत्र
देवतयोरैक्यमाह विद्यापि नादगात्मा विद्या चिदा
नंदस्वरूपिणी नादगात्मिका तद्गुणीर्णा च सूक्ष्मा
परिच्छेत्तुमशक्या सा सर्ववेदान्तेषु प्रसिद्धा त्रि
पुरसुंदरी त्रिपुरा च सुंदरी त्रिया वा स्थित समस्त
वस्तुस्फुरणात् सर्वयोगिभिरुपास्यत्वेन स्पृहणी
यत्वात् च त्रिपुराशब्दनिर्वचनं च पूर्वमेव प्रपं
चितम् देवी स्वच्छप्रकाशरूपा विश्वस्य जनना
दिक्रियारूपा परा वाक् विद्याविद्यात्मकयोरत्यन्ता
भेदमानन्दपार्थीः परमेश्वरप्रमुखाः सर्वयोगिन
इत्यर्थः एवं विद्यादेवतयोरपि अभेदमुक्त्वा च
क्रदेवतयोरैक्यं वक्तुं चक्रोत्पत्तिप्रकारमाह ॥

का॰
क॰
२१

चक्रस्यापि महेश्वपानभेदलेशोपि भा
व्यते विबुधैः अनयोः सूक्ष्माकारः परे
वस्तुलयाश्च न कापि भिदा २२ ॥

यासान्तरूहरूपा इति अन्तरन्तःकरणं तस्मिन् ऊ
हः वितर्कः इत्थमिति परिच्छेदराहितः तेन सहिते रू
पं यस्याः सा अयमर्थः अवाङ्मनसगोचरत्वात्
सर्ववेदान्तैरपरिच्छेद्या सर्वकारणभूता शिवा
दिपरपर्यन्ततत्त्वसंघाताविर्भावभूमिः महेश्वरी
परा सर्वोत्कृष्टेत्युच्यते स्फूर्तिश्च परास्य शक्तिर्वि
विधैव सूयते स्वाभाविके ज्ञानबलं क्रिया च एवं
भूतलक्षणा सैव पराशक्तिरेव त्रिभाविता त्रिप्र
कारत्वेन भाविता संज्ञानमाना एतदेवाह स्प
ष्टा पश्यन्त्यादित्रिमातृकात्मा इति स्पष्टा प्रथ
मोत्पन्नत्वेन विवक्षिता विषयिणी पश्यन्तीत्यु
च्यते आदिशाहैन मध्यमा वैखरी च सैव वैखरी
नामाभिलाषरूपिणी पंचदशाक्षरराशिमयी
सा च वैदिकलौकिकशास्त्रात्मिका शक्तिरित्यु
च्यते तथा च सुभगोदयवासनायाम् पुराभू
जन्मपश्यन्ती वह्नी गुह्यसमुद्भवा मध्यमा सो
रमा वैखर्यक्षमालाजयन्त्यसौ एवं रूपत्रिमा
तृकात्मिका सैव चक्रतां याता त्रिखण्डात्मकच
क्रैक्यमिवापेत्यर्थः एतदेवाह त्रैलोक्यमोह

नादिबैंदवान्तनवावरणात्मकस्य सुंदर्य
धिष्ठानभूतस्य महेश्वरायाः तदधिष्ठात्र्याः
सुंदर्याश्च भेदलेशः ईश्वरेदेवोपि बुधैर्माहेश्व
रैर्न भाव्यते नैवानुभूयते अतः श्रीसुंदरीरूप
त्वात् श्रीचक्रस्य पुनरप्यनयोस्तादृग्भेदमा
वष्टेश्चनयोः सूक्ष्माकारा इत्यादिना अनयोः
सूक्ष्मरूपयोः चक्रदेवतयोः सूक्ष्मरूपत्वेना
मापरिच्छिन्नत्वमेव तत्र श्रीचक्रस्य सूक्ष्मरू
पेणावस्थानं बिन्द्वात्मना बिंदोश्चापरिच्छिन्न
त्वं बैन्दवे परमाकाशे इत्यादिना प्रपंचितमेव
देवतायाश्चापि विद्यापि तादृशी वाक्मेत्यादिना
भिहितमेव तथास्थूलयोश्चक्रदेवतयोश्च
तत्र स्थूलत्वं नाम चक्रस्य त्रिकोणादिचतुरस्र
पर्यन्तविजृम्भणम् देवतायाश्चापि त्रिपुरा
म्बिकादित्रिपुराश्रयान्तरूपेण मननम्
एवंविधयोश्चक्रदेवतयोर्भेदाभेदः कारणा
दित्यर्थः अत्रहेतुमाह परैव सूक्ष्माकारा इति
सा पूर्वोक्तलक्षणा परैव आदिशक्तिरेव सू
क्ष्माकारः सूक्ष्मभूतश्चाकारः स्वरूपमनयोरि
त्यर्थः देवतारूपस्य चक्रस्यैतः परापरापश्य
न्त्यादिशक्तिविकासरूपेण वयोन्यात्मकं श्री
चक्रं वक्ष्मादौ बैन्दवं सर्वानंदमयाख्यं चक्रं
पराशक्तिमयमित्याह २१ ॥

का० मध्यं चक्रस्य स्यात्परामयं बिंदुतत्वमेवे
क० दम् उच्छूनं तच्च यदा त्रिकोणरूपेण
२२ परिणतं स्यादम् २२ ॥

(द्वियापि तादृगेवास्मत्प्रादिनाभिहितमेव तथा
स्थूलयोश्शुक्रदेवतयोश्च अत्र स्थूलत्वं नाम च
क्रस्य त्रिकोणादि चतुरस्रपर्यन्तं विस्तारणा
म् देवतायाश्चापि त्रिपुराम्बिकादित्रिपुराश्री
ना न्त्ररूपेण ततनम् एवंविधयोश्शुक्रदेवत
योर्भेदाभेदः कारणादित्यर्थः अत्र हेतुमाह
परैव ह्लदनाकार इति सा पूर्वोक्तलक्षणपरे
व वागदेवतैव ह्लदनाकारः ह्लदनत्मकत्वाका
रः स्वरूपमनयोरित्यर्थः) एतत्पश्यन्त्यादित्रित
यनिदानं त्रिवीजरूपं चेति चक्रस्य नवयोन्या
त्मकस्य मध्यं मध्यमवं बिंदुतत्वं बिन्दुस्वरूपं पू
र्वमेव व्याख्यातम् इदं स्वसाक्षात्कृतपरामय
मेव परशक्तिस्वरूपमेवेत्यर्थः एतदेव बिन्दु
तत्वं यदा विकासभावमेति तदा त्रिकोणचक्रमु
देतीत्याह उच्छूनं तच्च यदेति यदा यस्मिन्काले
प्राणिनामदृष्टवशाद् उच्छूनम् तच्चैतदेवमुच्छू
छूनं संजातं विकासं भवति तदा त्रिकोणरूपे
य णा तु तराणं देहामं घट रूपेण परिणतं त्रिकोणा
कारं भवतीत्यर्थः एवं त्रिकोणचक्रं पश्यन्त्यादि
त्रिततयनिदानम् पश्यन्तीमध्यमावैखरीष्व

मुखशक्तित्रयोत्पत्तिकारणमित्यर्थः तथाहि
इच्छाशक्तिस्तथावामापश्यन्तीवपुषास्थिता ज्ञा
नशक्तिस्तथाज्येष्ठामध्यमावागुदीरिताऋजुरे
खामयीविश्वस्थितामथितविग्रहा तत्संहृति
दशायांतुबैन्दवंरूपमास्थिता प्रत्याहृतिक्र
मेणैवशृंगाटवपुरुज्ज्वला क्रियाशक्तिस्तुरौ
द्रीयंवैखरीविश्वविग्रहाइति त्रिबीजरूपंचे
ति त्रिबीजानित्रिखंडात्मकानिवाग्भवकाम
राजशक्तिबीजानांरूपंयस्यतत् ततःश्रीभट्टा
रिकायामेवबिंदुत्रत्चमूर्धाधोनवयोन्यात्मक
श्रीचक्रमभवदित्याह २२ ॥

वामाज्येष्ठारौद्रीचाम्बिकातुत्तरांशभूताःस्युः इच्छाज्ञानक्रियाशान्ताश्चैतास्तथोत्तरावयवाः व्यस्ताव्यस्तेनतद्गणिद्वयमिदमेकादशात्मपश्यन्ती २३
एवंकामकलात्मात्रिबिंदुतत्त्वस्वरूपवर्णमयी ॥
वामाज्येष्ठारौद्रीश्चाम्बिका चकारात्पराशक्तिश्च
इमाःपंचशक्तयः अनुत्तरांशभूताःअनुत्तरां
शाःश्रीचक्रान्तर्गताश्चयोमुखानिपंचत्रिको
णाकृतित्वेनजाताइत्यर्थः इच्छाज्ञानक्रिया
शांताः एताश्चतस्रःशक्तयउत्तरावयवाः

12

ऊर्ध्वमुखत्रिकोणचतुष्टयरूपाः शैवभावः
पराविलसनरूपा एताः पश्यन्ती वामा ज्येष्ठा
रौद्री अम्बिकाः इच्छाज्ञानक्रियाशान्ताश्चेता
स्तथान्तरावयवाश्चेति एतच्छक्तिनवकम
यं नवत्रिकोणं चक्रमिति व्यस्ताव्यस्तं तद
र्णीद्वयम् व्यस्तं व्यष्टिरूपं अव्यस्तं समष्टिरू
पम् सर्वोपनिषत्प्रसिद्धम् अर्णद्वयं स
न्दशान्यायेनाखिलान्तरात्मकमेतन्मयप्र
काशविमर्शरूपपूर्णाहन्ताभावगर्भ
कामकलाक्षरात्मबिन्दुतत्त्वमित्यर्थः एवं
भूतेन तदर्णद्वये एकादशात्मसंहत्य विचा
र्यमाणे एकादशविशाकं व्यष्टिरूपं सर्वस
मष्टिरूपत्वेन चैकं तेन चैकादशात्मकमि
दं बिन्दुतत्त्वमेव पश्यन्तीकारणम् अतः प
रं वसुकोणदशारादिसृष्टिचक्रप्रकार
मभियान्तु परमप्रकृतित्रिकोणचक्रक्र
मेनिगमयति २४

**सेयं त्रिकोणरूपं याता त्रिगुणस्वरूपिणी माता २५**

एका परेति एवं पूर्वोक्तप्रकारेण कामकला
त्मा कामः प्रकाशैकस्वभावो नुत्तराक्षरात्मा
परमशिवः कलात्व अखिलवाणीरूपपर

माह अक्षरमयी विमर्शविग्रहा एतदुभ
यात्मकत्वेनामस्वाभाविकपरिपूर्णाहंभा
वशालित्वम् एतच्च बिंदुरहंकारात्मा इत्य
त्रस्पष्टमभिहितं एवंरूपा कामकलात्मा
त्रिबिंदुतत्त्वस्वरूपवर्णमयी त्रिबिंदवः
पूर्वोक्ता रक्तशुक्लकृष्णात्मानः तेषां भाव
स्तत्त्वं तत्स्वरूपा ये वर्णा वाग्भवादयस्तदा
त्मिका तथा रहस्याम्नाये बिंदुत्रयात्मकं
स्वात्मशृंगाटं विद्धि सुंदरं सितशुक्लं च रक्तं
च पुराणप्रणवात्मकम् रेखात्रयावगत
ब्रह्मविन्मात्रं शिवात्मकम् सेयं त्रिकोणरू
पमापन्ना चिदानन्दघनरसपरमार्था सक
लाम्नायसारभूता इयं विश्वाहंभावनाशालि
भिर्महायोगिवर्यैरात्मसाक्षित्वेनानुभूयमा
ना त्रिगुणा इच्छाज्ञानक्रियाशक्तिमया एवं
तथा अत एव सर्वजगन्मात्री एका तथा च
वचनम् अनुत्तरानंदचितिरिच्छाशक्तौ नि
योजिता त्रिकोणमिति तस्माद्विसर्गमो
दसुंदरमिति अतः परं विलसनरूपा पश्य
न्त्याख्या अपि नवयोनिचक्रात्मतां नवात्मि
कत्वमाह २५ ॥

तदन्या वामादिव्यष्टिमातृरूपात्मा
तेन नवात्मा जाता मातेति २६ ।

का॰
क॰
२३

तदन्या परांबिकासंभूता पश्यंतीवामादिव्यष्टि
मात्मस्थष्टात्मावामादिशक्तिनादिशक्तिनवक
मयी यतस्तेन कारणेन समाना पश्यन्ती ना
मजननी नवात्मावामादिशक्तीनां नवशक्ति
कदम्बकाविर्भावकारणं नवयोनिचक्रात्मि
काजाता प्रादुर्भूतेत्यर्थः अत्रवामादिशक्ती
नां प्रसंगात्किंचिदुच्यते तत्रवामानामस्य
गोटान्तःस्थितप्रपंचवमनाद्विसृजनयित्री
त्यभिधीयते ज्येष्ठा सर्वमंगलकारिणीरौ
द्रीसर्वरोगविद्राविणी समस्तोपद्रवशक्तिः
अम्बिका च सास्फुरत्तामहासत्तेतित्रव्यभित्वा
स्थित्वा सर्वातिशायिप्रणवाकृ परिपूर्णस्व
रूपत्वात्स्फुरणावलोकनं चतुरइच्छाज्ञा
नक्रियाशक्तयस्तु पश्यन्तीमध्यमावैखरीरू
पा इति पंचैमाः चतस्रः शक्तीनां नानिष्कलसूत्रा
न्मित्यादिष्कत्वा अनन्तरंमध्यमायाः अपि
प्रकारान्तरेण नवात्मकत्वं ब्रूते मध्यमाभिधा
नाभ्याम् द्विविधामध्यमासास्तत्मास्थूलाकृ
तिः स्थितासूक्ष्मा २७ ॥

नवनादमयीस्थूलानववर्णात्माचभू
तलिप्याख्या अत्राकारणमन्याका
र्यत्वनयोः यतस्तेनोहेतोः सैवेयं न
हिभेदस्तादात्म्येहतु हेतुमदभेदम्
२८ ॥

मध्यमापरापश्यन्त्योः समरसावस्थे अभिधा
नाभ्यां नामधेयाभ्याम् साऽतः सुखपरमयो
गिभिर्दृष्टा मध्यमानामशक्तिर्हि द्विधा द्विप्र
कारा स्थूलसूक्ष्मभावात् तत्र सूक्ष्मा समाधि
बलेनानुभूयमाना स्थूलाकृतिः पंडितपाम
राद्यभिलषनयोग्यावर्णावल्यां स्थिता सर्व
दा वर्तमाना एतदेव व्याचष्टे सूक्ष्मा नवना
दमयी स्थूला नववर्णात्मा उत्पद्यमर्थः मि
त्रावरुणसदनाद्वायुनिरोधनेन स्वाधिष्ठा
नादिकमलभेदपुरस्सरं द्वादशान्तारविंदा
सनस्थपरमशिवांकमुपसर्पन्ती महामा
त्रकाकुंडलिनी बहुविधनादात्मिका यानुभू
यते सा समाधिसमधिगतसर्वार्थैर्महामाहे
श्वरैः स्वात्मत्वेन मन्यते नवनादमयी चिणी
ति प्रथमः चिणिचिणीति द्वितीयः घंटानाद
स्तृतीयः शंखनादश्चतुर्थः पंचमस्तन्त्रीनादः
षष्ठस्तालनादः सप्तमो वेणुनादः अष्टमो
भेरीनादः नवमो मृदंगनादः भूतलिप्या
ख्या भूताश्चेति लिपयश्च ते भूतलिपयः अ
त्र लिपीनां भूतत्वात् चेष्टाविशेषाक्षरन्या
साभिव्यंग्यत्वम् तच्च कल्पनामात्रमेव अक्ष
राणां तेजोरूपशब्दात्मकत्वात् तेषामाख्या
अभिधा यस्याः सूक्ष्मरूपा हि मध्यमा स्थूलरू
पायाः कारणभावमापन्ना कैवेत्यत आह

का॰ क॰ २४

14

आद्याकारणमन्त्याकार्यं त्वनयोर्यतस्ततो हे
तोः सैवेयम् नहि भेदस्तादात्म्ये हेतुहेतुम
दभीष्टमिति आद्यापूर्वोक्तासूक्ष्माकारणप्र
थमोद्भवात् अन्त्यास्थूलाकार्यातज्जन्यत्वात्
कार्यं यतस्तस्मात्कारणात् अनयोः सूक्ष्मस्थू
लयोः कार्यकारणभावः ततो हेतोस्तेन का
रणेन इयं स्थूला सैव सूक्ष्मापराशक्तिरेव नहि
भेदः भेदो नास्त्येव ननु कथमभेदे कार्यका
रणभाव इत्यत्राह तादात्म्ये हेतुहेतुमद
भीष्टम् तादात्म्ये भेदाभेदरूपे हेतुहेतुम
जन्यजनकरूपमभीष्टम् मृद्घटवत् वा
चारम्भणमात्रत्वात् एकमेव वस्तु उभयवि
धं भवति सर्ववेदान्तसम्मतमित्यर्थः अन
न्तरं मध्यशृङ्गाटतेजः प्रसरणात्मकं वस्तु
कोणादिचक्रनिरूपणद्वारा वैखरीशक्त्या
विर्भावमाह २८ ॥

शषसपवर्गमयं तद्वसुकोणं मध्य
कोणविस्तारः नवकोणं मध्ये चेत्य
स्मिंश्चिद्दीपदीपिके दशाके २९ तट
चवर्गचतुष्टयविलसन्तविसृष्ट
कोणविस्तारमिति ।

शषसपवर्गमयं शषसपवर्गात्मकाष्टको

णस्य विस्तारो विकासभूतः तत्राष्टदशामध्य
कोणसहितं नवकोणमध्ये च बैन्दवाख्यं सं
हत्य दशाकेऽस्मिंस्त्रिकोणवसुकोणविदी
पदीपके बैन्दवासनसंरूढसंवर्त्तानलचित्र
तम् इत्युक्तरीत्या बिन्दुचक्राधिरूढाया मूले सा
जोभूतत्रिपुरायाः प्रभापटलप्रकाशितेत्य
र्थः तच्छायाद्वितयमिदम् दशारचक्रद्वयात्म
नावितततम् तस्य पूर्वोक्ततेजोराशिमयस्य च
क्रत्रितयस्य छायाद्वितयं कान्तिद्वितयम् स
र्वरक्षाकरसर्वार्थसाधकाभिधचक्रद्वयात्म
नापरिणतमित्यर्थः तथा चोक्तम् नवत्रिको
णस्फुरितप्रभारूपदशारकमिति तच्चक्रद्व
यस्वरूपं व्याचष्टे २९ तवर्गटवर्गात्माक्षरद
शकरूपमन्तर्दशारम् चवर्गकवर्गात्मका
क्षररूपं बहिर्दशारमित्यर्थः ३० ॥

**एतद्द्वन्द्वप्रभासमेतं दशारपरिणा**
**मः ३१ आदिस्वरनवकचतुर्दशाव**
**र्णमयं चतुर्दशारमभूत् परयाप**
**श्यन्त्यापि च मध्यमया स्थूलवर्णरू**
**पिण्या एताभिरेकोनपंचाशदक्षरा** २
**त्मा वैखरी जाता ३२ कादिभिरष्टभि**

का· क· १५

15

रुपचितमष्टदलाब्जं च वैखरीवर्गैः
स्वरगणसमुदितमेतदष्टदलाम्भोरु
हं च संचिन्त्यम् ३३ ॥

एतच्चक्रचतुष्कस्य बिंदुत्रिकोणवसुकोणान्त
र्दशारात्मकचक्रचतुष्कस्य प्रभा कान्तिः तया
समेतं संयुक्तं दशारपरिणामः बहिर्दशारच
क्रमिति यावत् बहिर्दशारचक्रस्य बैन्दवादिच
क्रचतुष्टयसन्निधानादेव तात्पर्येण तत्प्रभाव्या
प्नोतीत्यर्थः तथा चोक्तम् चतुश्चक्रप्रभारूपसं
युक्तपरिणामत इति अथ एतच्चक्रचतुष्कस्य
त्रिकोणवसुकोणदशारद्वयरूपस्य तदेवाह
३१ अकारादिचतुर्दशवर्णात्मचतुर्दशकोण
सहितं सर्वसौभाग्यदायकाभिधं चक्रमित्यर्थः
एवं बैंदवादिमनुकोणान्तपर्यन्तचक्रवर्णन
द्वारा वैखरीशक्तिराविर्भूतेत्याह ३२ अयमर्थः
आदिक्षान्ताक्षरराशिमयाखिलप्रपंचनिर्मात्री
सर्वशब्दात्मिका वैखरीति इतः परं सर्वसंक्षोभ
णसर्वाशापरिपूरकाभिधचक्रद्वयं वैखरीव
र्णात्मकमेवेत्याह ३२ वैखरीवर्गैर्वैखरीशक्ति
स्वरूपैः अष्टभिः कादिभिरुपचितं सम्यक्प्राप्त
मष्टदलाब्जं च सर्वसंक्षोभणचक्रम् तथा स्वर
गणसमुदितम् स्वरगणैरकारादिषोडशवर्णैः

समुदितं सम्यग्भावितम् एतत्परिदृश्यमानम
ष्टदलाम्भोरुहं सर्वाशापरिपूरकचक्रं संचिन्त्य
म् सर्वदाभावनीयमित्यर्थः ३३ ॥

बिन्दुत्रयमयतेजस्त्रितयविकारं च ता
नि हन्तानि भूबिम्बत्रयमेतत्पश्यन्त्या
दित्रिमात्रविश्रान्तिः ३४ क्रमणं पदवि
न्येपः क्रमोदयस्तेन कथनेन हे यथा श्राव
रणेशरूपं क्तिद्वयमिदमम्बापादाम्बु
जप्रसरमित्यादि ३५ ॥

तानि हन्तानि मन्वस्रोपरि अष्टदलपद्मोपरि
षोडशदलपद्मोपरि च स्थितानि बिंदुत्रयं पू
र्वोक्तरक्तशुक्लमिश्रात्मकं तन्मयं यत्तेजस्त्रित
यं सोमसूर्याग्निरूपं तद्विकारस्तन्मयानीत्यर्थः
तत्र हन्तस्य तेजस्त्रयात्मकत्वकथनेन सोम
सूर्यानलत्रिखंडमयत्वं चक्रस्योक्तम् तद्वि
कारश्च तानि हन्तानि वेदाः प्रमाणमिति वद्द
ष्टव्यम् भूबिम्बत्रयम् णिमादिब्राह्म्यादिसर्व
संक्षोभिणीमुद्रादिशक्तिकदम्बकवासनाभू
तं पश्यन्त्यादि त्रिमात्रविश्रान्ति पश्यन्ती मध्य
मा वैखरीशक्तय एतावत्पर्यन्ते विजृम्भमाणाः
त्रिकोणादिभूपुरपर्यन्तश्रीचक्रात्मना चकाम

इत्यर्थः एतस्यात्मनः स्फुरणमित्यारभ्य वैखरी
विग्रहेत्यन्तेन ग्रन्थजालेन सम्यगुदीरितम्
एवं मध्यचक्रस्येत्यादि उपक्रम्य पश्यन्त्यादि त्रि
मात्रविश्रान्तिरित्यन्तम् श्रीमहात्रिपुरसुंद
र्याः श्रीचक्रं सम्यग्निरूप्य अनन्तरं तथावर
णचक्रान्तर्गतशक्तिनिकुरम्बतन्निकटस्थि
तश्रीगुरुमंडलमपि श्रीदेव्यवयवपरिण
तिरूपमेवेत्याह इष अणिमादिमूलयोस्या
इत्यन्तम् ३५ क्रमणं पदक्रमः स च द्विविधः
पदविक्षेपरूपः क्रमोदयरूपश्च तत्र विक्षेपो
नाम सुंदर्यामनन्तकोटिकिरणात्मकानन्त
शक्तिजननसामर्थ्यम् क्रमोदयो नाम दिव्य
सिद्धमानवौघरूपा, तत्प्रकाशात्मकश्रीगु
रुमण्डलात्मकतया प्रसरणम् एतद्द्वन्द्वच
क्रद्वयं विवृणोति आवरणं आवरणचक्रस्थि
तशक्तिनिकुरुम्बं चाः क्रोशन्तीति वक्त्रु
पंक्तिः गुरुमंडलमिदं द्वयमम्बापादाम्बुज
प्रसरम् अम्बायास्त्रिपुरायाः पादाम्बुजस्य
श्रीपादयुगस्य प्रसरः प्रसरणम् विजृम्भण
मितियावत् तत्र प्रसारप्रसरणं क्रमशो वि
वृणोति ३५ ॥

**सेयं परा महेशी चक्राकारेण परिणमे**
**त यदा तद्देहावयवानां परिणतिरा,,**

वरणदेवतास्सर्वाः ३८ आसीनाबिंदु
मये चक्रेसात्रिपुरसुंदरीदेवी कामे
श्वराङ्कनिलयाकलयाचंद्रस्य कलि
तांतसा पाशांकुशेक्षुचापप्रसूनबा
णपंचकांचितस्वकरा बालारुणारु
णांगीशशिभानुकृशानुलोचनत्रि
नया ३८।
सेयमपरिच्छिन्नानन्ततेजोराशिमयीपरासर्वे
श्वर्यनन्तकोटियोगिनीवृन्दसमाराधितनि
त्यनिरवधिकातिशयानंदमयात्मसाम्राज्यस
म्पदभिमानशालिनी चक्राकारेणचक्रंनवा
त्मकमिदंनवधाभिन्नमंत्रकम् इतिबैन्दवादि
त्रैलोक्यमोहनान्तचक्रनवात्मनास्फुरन्तीमा
त्मनःप्रपेदिति पूर्णानंदामयात्मावलोक
समये परिणमेतस्त्राकारान्तरेणतद्देहावय
वानंतस्यास्त्रिपुरायादेहस्तेजःपुंजात्मकःत
स्यावयवाःकिरणास्तेषांपरिणतिरवस्थान्त
रापत्तिरिहावरणदेवतावधिन्यायेणमा
यनन्तशक्तिनिकुरुम्बेचिदानन्दसमुद्रात्म
कमेवसकाशात्वेफेनबुद्बुदतरंगादिवदन
न्तकोटिशक्तयःप्रादुर्भावतिरोभावोभज
न्तीत्यर्थः आसीनेत्यादि बिंदुमयेसर्वानंदा
ख्यपरमाकाशेबैन्दवे परमाकाशेइत्युक्त

का० क० १७

17

त्वात् इत्यर्थः चक्रेश्वात्मसंक्रामविहारपीठे आसी
ना उपरिप्रदेशे विराजमाना सा देशकालाका
रानवच्छिन्नात्मस्वरूपिणी त्रिपुरसुंदरी सर्व
कारणत्वेन सृष्टिहरणीया स्वेच्छा वा कामेश्वराङ्क
निलया कामेश्वरस्य श्रीनाथस्य अंकं वामोरु
भागः निलयः यानस्थानं यस्याः सा तथोक्ता
परमशिवेन कलाविद्यापराशक्तिः श्रीचक्रा
काररूपिणी तन्मध्ये बैन्दवं स्थानं तत्रास्ते प
रमेश्वरी सदाशिवेन संप्रोक्ता सर्वतत्त्वार्थ
तामसतीत्यादि देवी विश्वसृजनादिव्यापारवि
नोदिनी पाशः स्वात्मभेदबंधन इच्छाशक्तिस्व
रूपः अङ्कुशः स्वरूपभेदलक्षणोपायात्मकः
ज्ञानशक्तिमयः इक्षुचापेषुपंचके स्वाभिन्ना
काराबलिसाधनभूत क्रियाशक्तिस्वरूपे
अयमर्थः इच्छाज्ञानक्रियाशक्तयः एव तदा
त्मया पाशादिस्वरूपमापन्नाः तदुपासनमा
चरन्तीत्यर्थः तथा च इच्छाशक्तिमयं पाशं
ज्ञानमंकुशरूपिणम् क्रियाशक्तिमये बा
णधनुषी दधदुज्ज्वलम् एतदेव दिव्यमि
थुनं दिव्यसिद्धाग्रविशेषभेदभिन्नागुरुमं
डलस्वरूपमुपासतेत्याह ॥ तन्मिथुनंस
वीतीन[illegible]वेन सर्वोपनिषद्व्यासिद्धं काम
कामेश्वरीरूपम् अयमर्थः परमात्मा हि स
वीत्मानमेव स्त्रीपुंसमयं कृत्वा मिथुनरूपे

ण विहरन्ते प्रकाशविमर्शात्मना मिथुनीभू
त परमशिव एव सकलं तन्त्रं समवतारयदि
त्याह एवं मिथुनं कामकोश्वरीरूपं श्रीमह
र्धदीपनाथः वज्रेश्वरीज्येष्ठानाथः भगमा
लिनी मित्रदेवनाथः एवमादि मिथुनत्रया
त्मना दिव्यसिद्धमानवौघादिक्रमरूपेण वि
तन्ते मिथुनत्रयं विस्तृतमित्यर्थः इतः पर
मावरणदेवतास्वरूपमाचार्यो वर्णयिष्यति ३९

वसुकोणनिवासिन्यो यास्तास्संख्याकृ
ण वशिन्याद्याः पुर्यष्टकमेवेदं चक्र
तनोः संविदात्मनो देव्याः ४० तद्विध
या हन्त यत्ताः सर्वज्ञादिस्वरूपमाप
न्नाः अन्तर्दशारनिलयालसन्निशार
दित्सुस्वन्तराकाराः ४१ ॥

वसुकोणनिवासिन्यः सर्वरोगहराख्यचक्रनि
वासशीलाः याः वशिन्याद्याः अष्टशक्तयः पूर्ण
हम्भावानन्ददानसमर्थाः कथमत्र रोगहर
त्वेनामपूर्णाहम्भावप्रदत्वमेव अपूर्णमन्य
ता व्याधिः कार्पण्यैकनिधानभूरिसूक्तैः एवं
भूतास्ताः संख्याकृणाः अकृणकाराभासन्त
इत्यर्थः एतत् एवेदं अष्टकोणचक्रं संविदात्म

का॰
क॰
२८

18

नः संविज्ञानमेवात्मा स्वरूपं यस्याः सा सत्यंज्ञा
नमनन्तमिति श्रुतेः स्वसंवित्त्रिपुरादेवी तस्याग
माश्च देव्याः बहुस्यां प्रजायेयेति विहरणस्वभा
वायाः श्रीचक्रतनोश्चक्रात्मिकायाः स्थूलपुर्य
ष्टकशरीरमित्यर्थः । तद्विषयवृत्तयः वसुको
णनिकटनिवासिन्यः अतः स्वस्वाध्यात्मरूपरत्न
णयारित्वेन प्रसिद्धाः सर्वज्ञादिशक्तिदशाक
रूपंशामाः अन्तर्दशारनिलयाः सर्वज्ञाकरा
भिधेयचक्रसमारूढाः निगर्भयोगिन्यः शारदि
न्दुसुंदराः स्वप्रकाशपवलाकृतयः लसन्तिप्र
काशन्ते ४८ ।

तद्बाह्यपंक्तिकोणेषु योगिन्यः सर्वसि
द्धिदाः पूर्वाः देवीधीकर्मेन्द्रियविषय
मयाविषदवेषभूषाढ्याः ४९ भु
वनारचक्रभवनादेवीमनुकरणवि
वरस्फुरणाः सध्यासवर्णवसनाः सं
विन्त्याः संप्रदाययोगिन्यः ४९ अष्टक
महदहंकृतितन्मात्राणिविकृताङ्कु
नाकाराः द्विरदच्छदनसरोजेजयंति
गुप्ततरयोगिनीसंज्ञाः ४४ ॥

तद्बाह्यपंक्तिकोणेषु तस्य सर्वा रक्षाकरचक्र

स्वबाह्यभूतेषु उपरिस्थितेषु पंक्तिकोणेषु
सर्वार्थसाधके चक्रे तस्य कोणात्मकत्वात्
स्थिता योगिन्यः कुलकौलनामधेयाः सर्व
सिद्धिदाः पूर्वाः सर्वसिद्धिप्रमुखा दशशक्त
यः देवी धीकर्मेन्द्रियविषयमयाः देव्यास्त्रि
पुरायाः धीकर्मेन्द्रियाणि तेषां विषयास्तन्म
यास्तत्स्वरूपाः विषदवेषभूषाढ्याः विषदाः
शुभ्राकारा वेषाश्च भूषाश्च तैराढ्याः स्वयम
र्थः मंत्रदेवतात्माभेदरूपसिद्धिदायिन्यः स्व
च्छाकृतयः शुभ्राभरणाभासन्ते इत्यर्थः ५२
भुवनारचक्रं सर्वसौभाग्यदायकम् भवन
मावासस्थानं यासां ताः देवी मनुकरणानि च
तुर्दशकरणानि कर्मेन्द्रियाणि पंच मनो बु
द्ध्यहंकारचित्ताख्यानि चत्वारि तेषां विवरणे
व्याख्यानभूते स्फुरणं चतुर्दशारूपं यासां
ताः देवी तत्स्वयमेव चतुर्दशाकरणात्मक
चतुर्दशारचक्रदेवतात्मना स्थिता इत्यर्थः
संध्यायाः सवर्णसदृशं वसनं वस्त्रं यासां ताः
संप्रदाययोगिन्यः आदिशक्तिमयत्वेन संप्र
दायवेद्याः सर्वसंक्षोभिणीप्रभृतयः संवि
त्याः सम्यग्भावनीयाः ५३ अव्यक्तमव्यक्ता
ख्यं तत्त्वं महत्तत्त्वम् अहंकृतिरहंकारतत्त्व
म् तन्मात्राः पृथिव्यादिभूततन्मात्राः पंच
संहत्य तत्स्वरूपतैरभीष्टं स्वीकृतमाकारं

स्वरूपया संताः देव्यात्मका इत्यर्थः गुप्ततरयोगि
नीसंज्ञाः एतासामनङ्गकुसुमादीनां गुप्ततरे
तिसंज्ञा इति द्विरदच्छदनसरोजे सर्वसंक्षोभ
णाख्ये अष्टदलपद्मे जयन्ति सर्वोत्कर्षेण वर्तन्ते
४४ ॥

**भूतानीन्द्रियदशकं मनश्च देव्या वि
कारषोडशकम् कामाकर्षिण्यादि
स्वरूपतः षोडशारमध्यास्ते ४५ ।**

भूतानि पृथिव्यादीनि इंद्रियदशकं षोडशा
रं सर्वाशापरिपूरकनामधेयं चक्रं कामाकर्षि
ण्यादिस्वरूपतः कामाकर्षिण्यादिषोडशश
क्त्याकारेणाध्यास्ते अधितिष्ठति सर्वाशापरि
पूरके चक्रे एताः कामाकर्षिण्यादिगुप्तयो
गिन्यः सर्वात्मिका निवसन्तीत्यर्थः ४५

**मुद्रात्रिखंडया सह सर्वा विन्मय्यः समु
च्छ्रितास्सर्वाः आदिमहीगृहवासा
भासा बालार्ककान्तिभिः सदृशाः
४६ ॥**

त्रिखंडया सह त्रिखंडाख्यमुद्रया साकं स
मुच्छ्रिताः सर्वोत्कर्षेण वर्तमानाः आदि
महीगृहवासाः आदिमचतुरस्रनिलयाः

भासा कान्त्या बालार्ककान्तिभिः तरुणारु
णरुचिभिः सदृशास्तस्याः संविन्मय्याश्चिद्
ननिष्ठा इत्यर्थः ४६ ॥

आधारनवकस्यानवचक्रत्वेन परि
णतिं याताः नवनाथशक्तयोऽपि च
मुद्राकारेण परिणताश्च के ४७ मो
चयन्ति ग्रहादिभ्यः पाशौघान्द्रावय
न्ति च मोचनेद्रावणाय यस्मान्मुद्रास्ताः
परिकीर्तिताः ४८

एतास्तु मुद्राश्चतुरस्रादिबैन्दवान्तनवचक्रा
धिष्ठाननाथिकाः इति परमशिवेन प्रपंचिताः
एतदेव विवृणोति आधारेत्यादि आधारनव
के मूलाधारस्वाधिष्ठानमणिपूरकानाहतवि
शुद्धिलम्बिकाज्ञा बिन्दुरूपे यस्या उपासकस्व
रूपिण्याः सर्वेऽपि येन हेतुना नवचक्रत्वेन बै
न्दवात्मना परिणतेनाकारेण नवनाथशक्त
यः नवमुद्राकारेण परिणता जाता इत्यर्थः
अस्यास्त्वगादिसप्तकमाकरस्थैकमष्टकं स्यद
म् ब्राह्म्यादिमातृरूपमष्टममभूद्बिम्बमेतदध्या
त्मे अस्या देव्यास्त्वगादिसप्तकं त्वगादिसप्तधात
वः आकाशस्वरूपं च एवं रूपमष्टकं ब्राह्म्या
दिमातृरूपं ब्राह्म्याद्यष्टशक्तिस्वरूपं दयत म

का० धमचतुरस्रेतिवसन्तीत्यर्थः ४७ अस्याः प
क० रमेश्वर्याः अणिमाद्यष्टशक्तयः विविधान्त
२० राणांह्य योगादीनां स्वीकृतानि कमनीयानि
मनोहराणि कामिनीरूपाणि याभिस्ता एवं
20 भूता गुणभावेन उपसर्जनीभावेन भूमिनि
केतनगाः सर्वान्तचतुरस्रेति हन्तीत्यर्थः ४८

अणिमादिभूतयोऽस्याः स्वीकृतकम
नीयकामिनीरूपाः विद्यान्तरगुणभा
मू० वेन फलभूतानिकेतनगाः ४९ पर
मानंदानुभवः परमगुरुनिर्विशेषब
बिन्द्वात्मा सपुनः क्रमेणभिन्नः कामे
शांकयोविहिमर्शरूपम् ५० ॥

परमशिवादिगुरुमंत्रशिष्यानुजिघृक्षया प्र
तिपादयितुमुपक्रमते परमानन्दानुभव
इत्यादिना गुरुक्रमरूपेण विदित इत्यन्तेन
५९ परमः सर्वोत्कृष्ट आनंदः परिपूर्णाहमा
वरूपोनुभवः ज्ञानं यस्य परमगुरुरित्यादि पर
मगुरुरादिनाथः परमशिवः तस्मादादिना
थान्निर्विशेषः अभिन्नो बिन्दुः पूर्वोक्तकामक
लारूपः सआत्मा स्वरूपं यस्य ५० ॥

आसीनः श्रीपीठे कृतयुगकाले गुरुः
शिवो विद्यां नस्पष्टदौखशाक्तैकामे
श्वर्यै विमर्शरूपिण्यै ५८ इति काम
कलाविलासः संपूर्णं समाप्तम् ॥

सापीठे शामित्रेशसंज्ञान् स्वांशाञ्ज्येष्ठमध्यम
लाख्यान् चित्स्फारणविषयरूपांस्त्रेतादियुगा
दिकारणविशुद्धान् बीजत्रितयाधिपतीन्स्व
रीरूपविद्यां प्रकाशयामास एतैरेच त्रितयं
समनुगृहीतं गुरुक्रमो निगदितः उदितः प्र
णानन्दादिति कामकला[illegible]विलासोऽयम्
परमशिवभुजङ्गपाशाकर्षितचित्ताय कल्प
ते नित्यम् चित्तान्तरंगचपलत्वमासलिलप्र
पंचवाराप्तेः यदनुग्रहेणातीर्णस्तस्मै श्रीना
थनाथिकाय नमः ॥ इति कामकलाविला
सः समाप्तम् ॥ सं· १९५३ वैशाख
शु· २ शुभम् ॥